सांयात्रिकः, पुं, (संयात्रा द्वीपान्तरगमनम् । सा प्रयोजनमस्येति । संयात्रा + "तदस्य प्रयोजनम् ।" इति ठञ् ।) पोतवणिक् । इत्यमरः । १ । १०।१२ ॥ हे वहित्रगामिनि वणिग्जने । संपूर्व्वो यातिर्द्वीपान्तरगमनवृत्तिस्ततस्त्रासुचिति त्रः स्त्रियामाप् संयात्रा द्वीपान्तरगमनं तदस्य प्रयोजनमिति विकारसंघेति ष्णिकः । सम्यक् यात्रा संयात्रा तया व्यवहरतीति ढघेकादिति ष्णिको वा । इति भरतः ॥ (यथा, हरिवंशे । ५८ । १४ ।

"सिद्धिः सांयात्रिकाणान्तु वेला त्वं सागरस्य च ॥")

सांयुगीनः, त्रि, (संयुगे साधुः । संयुग + "प्रतिजनादिभ्यः खञ् ।" ४ । ४ । ९९ । इति खञ् ।) युद्धकुशलः । रणे साधुः । इत्यमरः । २ । ८ । ७७ ॥ (यथा, रघुः । ११ । ३० ।

"इत्यपास्तमखविघ्नयोस्तयोः
सांयुगीनमभिनन्द्य विक्रमम् ।
ऋत्विजः कुलपतेर्यथाक्रमं
वाग्यतस्य निरवर्त्तयन् क्रियाः ॥")

सांराविणं, क्ली,(सं + रु शब्दे ध्वनौ + "अभिविधौ भावे इनुण् ।" ३ । ३ । ४४ । इति इनुण् । "अणिनुणः ।" ५।४।१५। इति स्वार्थे अण् ।) हट्टस्य सम्यक् शब्दः । इति मुग्धबोधव्याकरणम् ॥ संपूर्व्व रुल ध्वनौ भावे णिनि णित्वाद्वृद्धौ संराविण इति स्थिते ततः स्वार्थे ष्णे णित्त्वे विराद्यच इति वृद्धौ ययोर्लोप इत्यकारलोपे सांराविणं हट्टस्य सम्यक् शब्दो व्याप्त इत्यर्थः । इति तट्टीकायां दुर्गादासः ॥ (यथा, अनर्घराघवे । ७ । ५७ ।

'यं दोर्मात्रपरिच्छदो युधि मुदोत्क्षिप्य प्रतीच्छन्मुहुः
संतेने दशभिर्निजैरपि मुखैः सांराविणं रावणः ॥")

सांवत्सरः, पुं, (संवत्सरं तज्ज्ञानोपयोगि शास्त्रं वेत्ति अधीते वा । संवत्सर + अण् ।) गणकः । इत्यमरः ।२।८।१४ ॥ (यथा, बृहत्संहितायाम् । २ । १०—११ ।

"मुहुर्त्तं तिथिनक्षत्रमृतवश्चायने तथा ।
सर्व्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि॥
तस्माद्राज्ञाभिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः ।
जयं यशःश्रियं भोगान् श्रेयश्च समभीप्सता ॥"

अस्य लक्षणादिकं तत्रैव २ अध्याये विशेषतो द्रष्टव्यम् ॥ * ॥ फले, पर्व्वणि च क्ली । इति पाणिनिः । ४।३। १६ ॥ संवत्सरस्येदमिति । अण् ।) सवत्सरसम्बन्धिनि, त्रि ॥ (यथा, हरिवंशे । १४० । ३ ।

"स सांवत्सरदीक्षायां दीक्षितः षट्पुरालये ।
आवर्त्तायाः शुभे तीरे ह्रदया मुनिजुष्टया ॥")

सांवत्सरिकः, त्रि, (संवत्सर + "कालात् ठञ् ।" ४।३।११। इति ठञ् ।) संवत्सरे भवः । संवत्सरं व्याप्य भूतः । प्रतिवर्षंकर्त्तव्यश्राद्धम् । यथा अथ सांवत्सरिकश्राद्धम् । तत्र गोभिलः । अत ऊर्द्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात् इति । अत ऊर्द्ध्वं सपिण्डीकरणान्तश्राद्धनिमित्तादाद्यसंवत्सरादूर्द्ध्वं संवत्सरे संवत्सरे प्रतिवर्षं यस्मिन्नहनि मृतस्तस्मिन्नहनि मृताय दद्यात् । व्याघ्रः । प्रतिसंवत्सरञ्चैवमेकोद्दिष्टं मृताहनि । एतेन सपिण्डीकरणापकर्षे आद्यसंवत्सरेऽपि मृताहे श्राद्धान्तरं कर्त्तव्यमिति मैथिलोक्तं हेयम् । व्यक्तमाह हेमाद्रिधृतं वचनम् ।

"पूर्ण्णे संवत्सरे श्राद्धं षोड़शं परिकीर्त्तितम् ।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते ॥"

अत्र पूर्णसंवत्सरक्रियमाणश्राद्धादुभयोभयनिर्व्वाहस्तथापकृष्ट-सपिण्डीकरणश्राद्धादप्युभयनिर्व्वाहो न पूर्णसंवत्सरे आब्दिकान्तरम् । एवं पञ्चदशश्राद्धेऽप्ययम् । मत्स्यपुराणम् ।

"ततः प्रभृति संक्रान्तावुपरागादिपर्व्वसु ।
त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि ॥"

ततः प्रेतत्वपरीहारात् त्रिपिण्डं त्रैपुरुषम् । निरुपपदमृताहशब्दः मृतसम्बन्धिमासपक्षतिथिविशेषपरः । उपपदात्तु क्वचित्तिथिविशेषमात्रपरः । यथा मृताहे प्रतिमासं कुर्य्यादित्यादौ । शङ्खः ।

"सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते ।
तत्र तत्र त्रयं कुर्य्यात् वर्ज्जयित्वा मृताहनि ॥
अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः ।
सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्व्वणो विधिः॥"

त्रयं सम्प्रदानानां त्रयं कुर्य्यात् त्रिभ्यो दद्यात् इत्यर्थः । मृताहपर्य्युदस्तत्रिदैवतत्वस्य प्रतिप्रसवमाह । अमावास्यामिति । प्रेतपक्षोऽत्र पितृपक्षः अश्वयुक्कृष्णपक्ष इति यावत् । न तु कृष्णपक्षमात्रं कृष्णपक्षसामान्यपरत्वे अमावास्यापदवैयर्थ्यापत्तेः ॥*॥ पितृपक्षं विशेषयति हेमाद्रिमाधवाचार्य्यधृतं नागरखण्डम् ।

"नभो वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः ॥"

अत्र श्रावणभाद्रयोरन्यतरस्य मलमासत्वे आषाढ्यपेक्षया सप्तमपक्षस्य पितृपक्षत्वात् । अत्र मृतस्यैव प्रेतपक्षमृतत्वं न तु मलमासभाद्रकृष्णपक्षमृतस्य । ततश्च तत्र मृतस्य वर्षान्तरे अश्वयुक्कृष्णपक्षेऽपि तच्छ्राद्धकरणे न पार्व्वणम् । किन्त्वेकोद्दिष्टमिति । अत्र पार्व्वणो विधिः पार्व्वणेतिकर्त्तव्यताकैकोद्दिष्टविधिरिति नव्यवर्द्धमानप्रभृतयः । तन्न पूर्व्ववचनोक्तत्रैपुरुषिकस्य मृताहे पर्य्युदस्तस्य पार्व्वणो विधिरित्यनेन प्रतिप्रसवात् । तस्मादत्र सदैवत्तैकोद्दिष्टं न युक्तं किन्तु त्रैपुरुषिकं न तु षाट्पुरुषिकम् ।

"कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकञ्च शेषेषु पिण्डाः स्युः षड़िति स्थितिः ॥"

इति छन्दोगपरिशिष्टवचनेन प्रत्याब्दिकव्यतिरेकेण षट्संख्यानियमात् ॥ * ॥ एवममावास्यादिमरणनिमित्तेन मातुरपि प्रत्याब्दिकं पार्व्वणविधिनैव ।

"अपुत्त्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम् ॥"

इत्यापस्तम्बवचने अपुत्त्रा इति विशेषणोपादानात् सपुत्त्राणां पार्व्वणाभ्यनुज्ञानात् । एतच्च मात्रादित्रितयदैवतं कार्य्यम् । मात्रे पितामह्यै प्रपितामह्यै च पूर्व्ववत् ब्राह्मणान् भोजयित्वा इत्यन्वष्टकायां तथा दर्शनात् । अवसानदिननिमित्तेन पार्व्वणविधिना छन्दोगैरपि मात्रादित्रिकाणां श्राद्धं कर्त्तव्यम् । न योषिद्भ्यः पृथग्दद्यादवसानादिनादृते । इति छन्दोगपरिशिष्टवचने विशेषतः प्रतिप्रसवात् । एवं सपिण्डीकरणेऽपि । एतच्च मृताहपार्व्वणं मातापित्रोरेव । तथा च हेमाद्रिधृतं कात्यायनवचनम् ।

"सपिण्डीकरणादूर्द्ध्वं पित्रोरेव हि पार्व्वणम् ।
पितृव्यभ्रातृमातृणामेकोद्दिष्टं सदैव तु ॥"

मातृपदं सपत्नीमातृपरम् । सपत्नीमात्रित्यत्र मातृपदस्य राजदन्तादित्वात् परनिपातः । ततश्च वाक्ये मातृसपत्नीति न प्रयोज्यं किन्तु सपत्नीमातरित्यादिकम् ॥*॥ एवं साग्निकौरसक्षेत्रजाभ्यां मृताहे पार्व्वणं कर्त्तव्यम् ।

"औरसक्षेत्रजौ पुत्त्रौ विधिना पार्व्वणेन तु ।
प्रत्यब्दमितरे कुर्य्युरेकोद्दिष्टं सुता दश ॥"

इति जाबालवचनस्य ।

"यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम् ।
पार्व्वणेन विधानेन देयमग्निमता सदा ॥"

इति मत्स्यपुराणवचनस्य चैकवाक्यत्वात् । उशनाश्च ।

"प्रत्यब्दं दर्शवच्छ्राद्धं साग्निः कुर्व्वीत वै द्विजः ।
एकोद्दिष्टं सदा कुर्य्यान्निरग्निः श्राद्धदः सुतः ॥"

अत्र प्रागुक्तयुक्त्या प्रेतश्राद्धस्य एकोद्दिष्टत्वाभिधानात् सांवत्सरिकश्राद्धे यदेकोद्दिष्टपदमुक्तं तत् प्रेतश्राद्धधर्म्मप्राप्त्यर्थम् । ततश्च योग्यत्वादेकार्घ्यादिलाभः । न तु यथा प्रेतश्राद्धे पितृशब्दस्थाने प्रेतपदोहः तथा अत्रापीति वाच्यं सांवत्सरिके प्रेतत्वाभावात्तथाविधानानुपपत्तेः । एवं प्रतिसांवत्सरिकश्राद्धे सम्बन्धार्थपदं आशीःप्रार्थनं शेषभोजनञ्च कर्त्तव्यम् ॥*॥ रजस्वलायां विशेषयति गोतमः ।

"अपुत्त्रा तु यदा भार्य्या सम्प्राप्ते भर्त्तुराब्दिके ।
रजस्वला भवेत् सा तु कुर्य्यात् तत्पञ्चमे दिने ॥"

कुर्य्याच्छ्राद्धमिति शेषः । यत्तु श्राद्धचिन्तामणौ एकोद्दिष्टं वैवर्णिकेन सिद्धान्नेन कर्त्तव्यम् ।

"एकोद्दिष्टं कर्त्तव्यं पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदह्नः समुपोषणम् ॥"

इति लघुहारीतवचनात् ॥

पाकपात्राभावः पाकसामग्र्यभावोपलक्षकः । तदापि नामश्राद्धं किन्तूपोषणमेव श्राद्धस्थानीयमित्यर्थः । स्वयमित्यभिधानात् अपाटवादिनापि